संस्कृत-वार्ता:
18-07-2024
सायम् - 06:20

<u>मुख्यवार्ता:</u>

- गोंडा-गोरखपुरमार्गे मनकापुरस्थानकस्य पार्श्वे चण्डीगढ़-डिब्रूगढ-एक्सप्रेस-रेलयानम् रेलपट्टिकातः अधोगतम्।एतस्यां दुर्घटनायां द्वौ जनौ मृत्युमुपगतौ,सहैव विंशतिः जनाः व्रणिताः समभवन्।
- तेलंगानायां राज्यसर्वकारेण कृषकाणां सस्य-ऋणमुक्तये षड्सहस्रकोटितोऽप्यधिकानि रुप्यकाणि निस्सारितानि। प्रथमचरणे एकादशलक्षाधिकाः जनाः लाभान्विताः भविष्यन्ति।
- भारतीय - ऋतुविज्ञान - विभागेन अद्यारभ्य दिनद्वयस्य अधिकवर्षायाः भविष्यवाणी कृताऽस्ति ।
- भारतीय-टेनिस-क्रीडकः सुमित नागलः स्वीडिश-ओपन-प्रतिस्पर्धायां परिभूय बहिर्भूतः।

<u>गोंडा-रेल दुर्घटना</u>

गोंडा-गोरखपुरमार्गे मनकापुरस्थानकस्य पार्श्वे चण्डीगढ़-डिब्रूगढ-एक्सप्रेस-रेलयानम् रेलपट्टिकातः अधोगतम्।एतस्यां दुर्घटनायां द्वौ जनौ मृत्युमुपगतौ,सहैव विंशतिः जनाः व्रणिताः समभवन्।

<u>तेलंगाना-सहायताराशि:</u>

तेलंगानायां राज्यसर्वकारेण कृषकाणां सस्यऋणमुक्तये षड्सहस्रकोटितोऽप्यधिकानि रुप्यकाणि निस्सारितानि।प्रथमचरणे एकादशलक्षाधिकाः जनाः लाभान्विताः भविष्यन्ति।

<u>सर्वोच्चन्यायमूर्तय:</u>

न्यायमूर्ति: नोंगमेइकापम-कोटिस्वरसिंह: न्यायमूर्ति आर. महादेवनश्च अद्य सर्वोच्च न्यायालयस्य न्यायाधीशत्वेन शपथग्रहणम् अकुरुताम्। भारतस्य मुख्यन्यायाधीशेन न्यायमूर्तिना डी. वाई. चन्द्रचूड़ इत्यनेन शपथवचनं ग्राहितम्। इत: प्राक् न्यायमूर्ति: नोंगमेइकापम-कोटिस्वरसिंह: जम्मू-कश्मीर अथ लद्दाख उच्च न्यायालयस्य न्यायधीश: आसीत्।

## ओमान दुर्घटना

भारतीय-विदेशराज्यमन्त्री कीर्तिवर्धनसिंहः ओमानस्थेन भारतीय-राजदूतेन अमितनारंगेन दुर्घटनाग्रस्त - जलपोत एम. वी. प्रेसटीज फाल्कन इत्यस्मिन् विषये साम्प्रतिकस्थितेः ज्ञानं लब्धवान्। एकस्मिन् सामाजिक- सूचना-प्रसारतन्त्रजाले प्रसारिते सन्देशे राज्यमन्त्रिणा उक्तं यत् एकस्य भारतीयस्य पार्थिव-शरीरमपि लब्धमस्तीति। राज्यमन्त्रिणा एतदपि प्रोक्तं यत् स्थितिः निकटतया अवलोक्यते, प्रशासनञ्च सर्वविधसहायताम् आचरदस्ति। तेन आपदुद्धार-कर्मणि निरतेभ्यः सर्वेभ्यः ओमानभारतयोः अधिकारिभ्यः साधुवादाः प्रदत्ताः। तेन मृतकस्य परिजनान् प्रति सम्वेदना व्यक्तीकृता।

## नीट-परीक्षा

सर्वोच्च-न्यायालयेन प्रोदीरितं यत् नीट् इत्यस्य पुनर्परीक्षा दृढतया भवेद्यत: अनेन सम्पूर्णपरीक्षायाः शुचिता प्रभाविता भविष्यति । मुख्यन्यायाधीशस्य डी० वाई चन्द्रचूडस्य नेतृत्वे सर्वोच्चन्यायालयपीठेन अद्य नीट-यूजी-चतुर्विंशत्यधिक-द्विसहस्रतमस्या: मेडिकल-प्रवेशपरीक्षायाः संचालने संभूतानां कथितानियमिततानां सन्दर्भे चत्त्वारिंशदधिक याचिकानां वादश्रवणं समाब्धम् । अन्वेषणसन्दर्भे पीठेन प्रख्यापितं यत् केन्द्रियान्वेषणा भिकरणस्य अन्वेषणं यथावस्थमेव प्रचलिष्यति। केन्द्रियान्वेषणा-भिकरणेन यदि अन्वेषणेन सम्बन्धितविषयाणां प्रोद्घाटनं यदि करिष्यते तदा सम्बद्धापराधिनः सावधानाः भविष्यन्ति । मुख्यन्यायाधीशः डी० वाई चन्द्रचूडः, न्यायाधीशः जे. डी. पारदीवाला एवं मनोज मिश्रा इत्येतेषां समेकितपीठेन विवादित-मेडिकल-प्रवेशपरीक्षया सम्बन्धित याचिकाः समालक्ष्य निर्णायक -वादश्रवणं समारब्धम्। पीठेन मे-मासस्य पञ्चमदिनाङ्के परीक्षायां कथितानियमितताः समालक्ष्य कथितं यत् याचिकाकर्तृणः प्रमाणीकुर्वन्तु यत् प्रश्नपत्त प्रवचना प्रणालीगतरीत्या अभवत ।

## नीट प्रवञ्चना-निगडनम्

नीट-यूजी प्रवेशपरीक्षाया प्रश्नपत्रप्रवञ्चनायां केन्द्रीयान्वेषणाभिकरणेन अद्य अखिल-भारतीय-आयुर्विज्ञान - संस्थान - पटना- इत्यस्य चत्वारः छात्रा: निगडिताः। एम्स-पटनायाः कार्यकारी-निदेशकः डॉ. जी के पालः अवोचत् यत्र ये छात्रा: निगडिताः ते एमबीबीएस – पाठ्यक्रमस्य-द्वितीय-तृतीयवर्षयोः छात्रास्सन्ति। तेनोदीरितं यत् केन्द्रियान्वेषणाभिकरणेन निगडितच्छात्राणां संगणकयन्त्राण्यपि स्वायत्तीकृतानि। एतैः छात्रै: सह केन्द्रियान्वेषणाभिकरणस्य परिपृच्छा जायमाना अस्ति ।

## काशीविश्वनाथो विजयतेतराम

काशीविश्वनाथधाम्नि स्पर्शदर्शनादय: दैनन्दिन-चिटिकया प्राप्यप्रवेशाः आश्रवणमासं यावत् निरस्ताः सन्ति । विशेषतो निरसनादेशः श्रावण- मासस्य सोमवासराय प्रवर्तते। श्रावणमासः अस्य ऑग्लमासस्य द्वाविंशतितमात् दिनाङ्कात् समारभते। अगस्तमासस्य एकोनविंशे दिनाङ्के च मासस्यावसानं भविष्यति। आकाशवाण्याः वार्ताहरेण प्रोक्तं यत् नूतनाः दिङ्निर्देशाः दर्शनाय, पूजनाय, भक्तानां सुरक्षायै च सन्ति प्रस्ताविताः। विशिष्टाः दर्शनार्थिनः समयविशेषे एव आगन्तुं प्रभवन्ति। आरक्षिमहानिदेशकः सुरक्षाविषये वार्ताहरान् इत्यपि अकथयत् यत् काशीविश्वनाथवाराणसीं प्रति आगन्तृभ्यः भक्तेभ्यः सुरक्षा-प्रदानाय सर्वेषां दर्शकानां भक्तानाम्वा सामग्र्यः मन्दिरप्रदेशात् बहिरेव सुरक्षितस्थानेषु स्थापयिष्यन्ते इति ।

## शाह:-नारकोटिक्स

केन्द्रीयगृहमन्त्री अमितशाहः नवदिल्ल्यां नारको-समन्वयकेन्द्रस्य सप्तमस्य शीर्षस्तरीयोपवेशनस्य अध्यक्षतां कुर्वन्नस्ति। अस्योपवेशनस्य उद्देश्यं तावत् मादकद्रयाणां तस्करणं सम्मुखीकर्तुं केन्द्रीय-राज्य सर्वकारयोः अभिकरणानां प्रयासस्य समन्वयनमिति। गृहमन्त्रालयेन प्रख्यापितं यत् मादक-द्रव्य-सम्बद्धानि समाह्वानानि सम्मुखीकर्तुं सर्वकारेण असहिष्णुतायाः नीतिः समाश्रियते ।

## ऋतुविज्ञानविभाग:

भारतीय - ऋतुविज्ञान - विभागेन अद्यारभ्य दिनद्वयस्य अधिकवर्षायाः भविष्यवाणी कृताऽस्ति । अस्मिन् कालावधौ आन्ध्रप्रदेश- यनमयोः तटवर्तिषु क्षेत्रेषु, तेलंगानायाञ्च वर्षाधिक्यस्य सम्भावना प्रवर्तते। एकोनविंशे विंशे च दिनांके चण्डीगढक्षेत्रे वर्षाधिक्यस्य सम्भावनाऽस्ति । कोंकण गोवादिषु द्विपीयक्षेत्रेष्वपि भूरिशः वर्षायाः सम्भावना अस्ति।

## मण्डाविया-KIRTI

युवसम्बन्ध अथ खेलमन्त्री डॉ, मनसुख-मण्डाविया प्रशासनस्य कीर्ति इति खेलो-इण्डिया - राइजिंग - टेलेंट - आईडेन्टीफिकेशन इत्यभियानस्य द्वितीयचरणस्य श्वः नवदिल्ल्यां शुभारम्भो विधास्यति । मन्त्रालयेन प्रोक्तं यत् कीर्ति इत्यनेन नूतना: क्रीडका: अत्याधुनिक प्रविधिना अन्विष्य परिपोषयिष्यन्ते च । प्राथमिकस्तरेण प्रातिभ्यम् अन्विष्य अग्रे नयनम् अस्याभियानस्य प्राथमिककार्यमस्तीति मन्त्रालयेन प्रोक्तम् ।

## बाइडेन - ट्रम्पः

संयुक्त राज्य - अमेरिकायाः राष्ट्रपतेः जो बाइडेन: इत्यस्योपरि राष्ट्रपतेः नैर्वाचनिक-समराङ्गणात् बहिर्गमनस्य स्थितिः जायते। जो बाइडेन इत्येषः कोरोनारोगेण ग्रस्तोऽभवत्। डेमोक्रेटिक-पार्टीतिदलस्य प्रभावशाली नेत्रा एवं कैलिफोर्नियाया: प्रतिनिधिन् एडम-शिफ इत्यनेन सार्वजनिकरूपेण राष्ट्रपतिः जो-बाइडेनः नैर्वाचनिक-समराङ्गणात् बहिर्गन्तुं प्रकथितः। एबीसी वार्तामाध्यमेन प्रोक्तं यत् वरिष्ठनेत्रा चक-शुमरेण जो बाइडेन इत्यस्मै कथितं यत् यदि तेन स्वास्थ्यकारणात् निर्वाचनाभियानं त्यज्यते तदा डेमोक्रेटिक-दलाय-देशस्य च कृते सौकर्यं भविष्यति। डेमोक्रेटिक पार्टीति दलेन नवम्बरमासीय-निर्वाचने डोनाल्ड ट्रंप इत्यमुं सम्मुखीकर्तुं जो-वाइडेन इत्येषः निर्वाचितः।

## गाजापट्टी

संयुक्तराष्ट्रे भारतेन गाजापट्टी इत्यस्मिन् स्थाने तत्कालतया पूर्णरूपेण च संघर्षविराम: भवेदिति स्वकीया अभ्यर्थना पुनरुच्चारिताऽस्ति। भारतेन विनैव न्यासेन बन्धकानां मोचनस्यापि आवाहनं कृतमस्ति। बुधवासरे पश्चिम-एशिया विषये सम्बन्धिते एकस्मिन् मुक्तसंवादे संयुक्तराष्ट्र-सुरक्षापरिषदि भारतस्य उपप्रतिनिधिना आर. रविन्द्रेन उक्तं यत् नैकानि वर्षाणि यावत् नैकै: प्रकारैश्च फलिस्तीनदेशाय प्रदत्त: विकाससहायता सम्बन्धी धनराशि: विंशत्यधिकैकशतमिलियन अमरिकी-डॉलर-परिमितोऽस्ति। वाशिंगटनस्य दूतेन लिंडा-थॉमस-ग्रीनफील्ड इत्यनया संयुक्तराष्ट्रसुरक्षापरिषदि उक्तं यत् अपेक्षाया: प्रायश: चतुर्मासानन्तरं गजायां शन्तिमार्गे प्रगति: अवलोक्यते इति।

## टेनिस-सुमितनागलः

भारतीय-टेनिस-क्रीडकः सुमित नागलः स्वीडिश-ओपन-प्रतिस्पर्धायां परिभूय बहिर्भूतः। नागलः अद्य सायं पुरुष-एकल-प्रतिस्पर्धायां अर्जेंटीनायाः मारियानो नवोन इत्यनेन पराजितः।

।। इति वार्ता: ।।